## फक्फिञोरन्यतरस्याम्। (९१/१०८७)

यूनि इत्येव। [1]पूर्वसूत्रेण नित्ये लुकि प्राप्ते विकल्प उच्यते। फक्फिञोर्युवप्रत्यययोः प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षितेऽन्यतरस्यां लुग् भवति। गर्गादिभ्यो यञि (४.१.१०५/११०७) कृते 'यञिञोश्च' (४.१.१०१/११०३) इति [2]फक्, गार्ग्यायणः। [3]तस्य छात्राः गार्गीयाः, गार्ग्यायणीयाः। वात्सीयाः, वात्स्यायनीयाः। फिञः खल्वपि-यस्कस्यापत्यं, 'शिवादिभ्योऽण्' (४.१.११२/१११५), यास्कः। तस्यापत्यं युवा, 'अणो द्व्यचः' (४.१.१५६/११८०) इति फिञ्, यास्कायनिः। तस्य छात्राः यास्कीयाः, यास्कायनीयाः[3]॥

## तस्यापत्यम्। (९२/१०८८)

अर्थनिर्देशोऽयं, पूर्वैरुत्तरैश्च प्रत्ययैरभिसम्बध्यते। तस्य इति षष्ठीसमर्थात् अपत्यम् इत्येतस्मिन्नर्थे यथा-विहितं प्रत्ययो भवति। [4]प्रकृत्यर्थविशिष्टः षष्ठ्यर्थोऽपत्यमात्रञ्चेह गृह्यते। लिङ्गवचनादिकमन्यत् सर्वमविवक्षि-तम्। उपगोरपत्यम् औपगवः। आश्वपतः। दैत्यः। औत्सः। स्त्रैणः। पौंस्नः।

तस्येदमपत्येऽपि बाधनार्थं [5]कृतं भवेत्।
उत्सर्गः शेष एवासौ [6]वृद्धान्यस्य प्रयोजनम् (म.भा. २.२४५)॥

भानोरपत्यम् भानवः। [7]श्यामगवः॥

## एको गोत्रे। (९३/१०९३)

'अपत्यं पौत्रप्रभृति गोत्रम्' (४.१.१६२/१०८९)। तस्मिन् विवक्षिते भेदेन प्रत्ययपत्यं प्रत्ययोत्पत्तिप्रसङ्गे नियमः क्रियते, गोत्रे एक एव प्रत्ययो भवति, सर्वेऽपत्येन युज्यन्ते। अपतनादपत्यम्[8]। योऽपि व्यवहितेन जनितः, सोऽपि [9]प्रथमप्रकृतेरपत्यं भवत्येव। गर्गस्यापत्यं गार्गिः। गार्गेरपत्यं गार्ग्यः। तत्पुत्रोऽपि गार्ग्यः। सर्वस्मिन् व्यवहितजनितेऽपि गोत्रापत्ये गर्गशब्दाद् यञेव भवति इति प्रत्ययो नियम्यते। अथवा गोत्रापत्ये विवक्षिते एक एव शब्दः प्रथमा प्रकृतिः प्रत्ययमुत्पादयति इति [10]प्रकृतिर्नियम्यते। गार्ग्यः। नाडायनः॥

## गोत्राद्यून्यस्त्रियाम्। (९४/१०९४)

अयमपि नियमः। यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो भवति[11], न परमप्रकृत्यनन्तरयुवभ्यः। [12]गार्ग्य-स्यापत्यं युवा गार्ग्यायणः। वात्स्यायनः[13]। दाक्षायणः। प्लाक्षायणः। औपगविः। नाडायनिः। अस्त्रि-याम् इति किम्? दाक्षी। प्लाक्षी[14]। किं पुनरत्र प्रतिषिध्यते? यदि नियमः, स्त्रियामनियमः प्राप्नोति। अथ[15]युवप्रत्ययः, स्त्रियां गोत्रप्रत्ययेना[16]भिधानं न प्राप्नोति, गोत्रसञ्ज्ञायाः युवसञ्ज्ञया बाधितत्वात्। तस्माद् योगविभागः कर्तव्यः। गोत्राद् यूनि प्रत्ययो भवति। ततोऽस्त्रियाम्। यूनि यदुक्तं तत् स्त्रियां न भवति[17]। युवसञ्ज्ञैव प्रतिषिध्यते, तेन स्त्री गोत्रप्रत्ययेनाभिधास्यते॥

---

1. पूर्वेण नित्ये प्राप्ते इ.ब.क.ह. 2. यूनि इत्यधिकम् इ.क.ड. 3. वा इत्यधिकम् फ. 4. षष्ठ्यर्थः प्रकृत्यर्थविशिष्टं ब. इ. 5. कथं क. 6. वृद्धाद्यस्य क. 7. नास्ति फ. 8. इति इत्यधिकम् फ. 9. परम° ब. क. ड. फ. ई. 10. प्रकृतिः नास्ति ब. 11. अस्त्रियां विषये इत्यधिकम् फ. ब. ई. 12. गार्गस्य फ. 13. नाडायनः इत्यधिकम् फ. 14. नाडायनी इत्यधिकम् फ. 15. युवप्रत्ययप्रतिषेधः क. ड. 16. प्रतिषिध्यते ब. ई. फ. इ. 17. इति इत्यधिकम् क.